# .. hArItagItA ..

# ॥ હારીતગીતા ॥

## Document Information

Text title : hArItagItA
File name : haariitagiitaa.itx
Category : gItA
Location : doc_giitaa
Language : Sanskrit
Subject : religion
Transliterated by : Professor Tokunaga in Kyoto system(?) then expanded
Proofread by : Sunder Hattangadi(sunderh at hotmail.com)
Latest update : June 2, 1998, March 24, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ હારીતગીતા ॥

અધ્યાયઃ ૨૬૯
યુધિષ્ઠિર ઉવાચ
કિં શીલઃ કિં સમાચારઃ કિં વિદ્યઃ કિં પરાયનઃ ।
પ્રાપ્નોતિ બ્રહ્મણઃ સ્થાનં યત્પરં પ્રકૃતેર્ધ્રુવમ્ ॥ ૧॥

ભીષ્મ ઉવાચ
મોક્ષધર્મેષુ નિરતો લધ્વાહારો જિતેન્દ્રિયઃ ।
પ્રાપ્નોતિ પરમં સ્થાનં યત્પરં પ્રકૃતેર્ધ્રુવમ્ ॥ ૨॥

સ્વગૃહાદભિનિઃસૃત્ય લાભાલાભે સમો મુનિઃ ।
સમુપોધેષુ કામેષુ નિરપેક્ષઃ પરિવ્રજેત્ ॥ ૩ ॥

ન ચક્ષુષા ન મનસા ન વાચા દૂસયેદપિ ।
ન પ્રત્યક્ષં પરોક્ષં વા દૂસનં વ્યાહરેત્ક્વ ચિત્ ॥ ૪॥

ન હિંસ્યાત્સર્વભૂતાનિ મૈત્રાયણ ગતિશ્ ચરેત્ ।
નેદં જીવિતમાસાદ્ય વૈરં કુર્વીત કેન ચિત્ ॥ ૫॥

અતિવાદાંસ્તિતિક્ષેત નાભિમન્યેત્કથં ચન ।
ક્રોધ્યમાનઃ પ્રિયં બ્રૂયાદાક્રુષ્ટઃ કુશલં વદેત્ ॥ ૬॥

પ્રદક્ષિણં પ્રસવ્યં ચ ગ્રામમધ્યે ન ચાચરેત્ ।
ભૈક્ષ ચર્યામનાપન્નો ન ગચ્છેત્પૂર્વકેતિતઃ ॥ ૭॥

અવિકીર્ણઃ સુગુપ્તશ્ચ ન વાચા હ્યપ્રિયં વદેત્ ।
મૃદુઃ સ્યાદપ્રતિક્રૂરો વિસ્રબ્ધઃ સ્યાદરોષણઃ ॥ ૮॥

વિધૂમે ન્યસ્તમુસલે વ્યઙ્ગારે ભુક્તવજ્જને ।
અતીતે પાત્રસઞ્ચારે ભિક્ષાં લિપ્સેત વૈ મુનિઃ ॥ ૯॥

અનુયાત્રિકમર્થસ્ય માત્રા લાભેષ્વનાદૃતઃ ।
અલાભે ન વિહન્યેત લાભશ્ચૈનં ન હર્ષયેત્ ॥ ૧૦॥

લાભં સાધારણં નેચ્છેન્ન ભુઞ્જીતાભિપૂજિતઃ ।
અભિપૂજિત લાભં હિ જુગુપ્સેતૈવ તાદૃશઃ ॥ ૧૧॥

ન ચાન્ન દોષાન્નિન્દેત ન ગુણાનભિપૂજયેત્ ।
શયાસને વિવિક્તે ચ નિત્યમેવાભિપૂજયેત્ ॥ ૧૨॥

શૂન્યાગરં વૃક્ષમૂલમરણ્યમથ વા ગુહામ્ ।
અજ્ઞાતચર્યાં ગત્વાન્યાં તતોઽન્યત્રૈવ સંવિશેત્ ॥ ૧૩॥

અનુરોધવિરોધાભ્યાં સમઃ સ્યાદચલો ધ્રુવઃ ।
સુકૃતં દુષ્કૃતં ચોભે નાનુરુધ્યેત કર્મણિ ॥ ૧૪॥

નિત્યતૃપ્તઃ સુસંતુષ્ટઃ પ્રસન્નવદનેન્દ્રિયઃ ।
વિભીર્જપ્યપરો મૌની વૈરાગ્યં સમુપાશ્રિતઃ ॥ ૧૫॥

અભ્યસ્તં ભૌતિકં પશ્યન્ ભૂતાનામાગતીં ગતિમ્ ।
નિસ્પૃહઃ સમદર્શી ચ પક્વાપક્વેન વર્તયન્ ।
આત્મના યઃ પ્રશાન્તાત્મા લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૧૬॥

વાચો વેગં મનસઃ ક્રોધવેગં
વિવિત્સા વેગમુદરોપસ્થ વેગમ્ ।
એતાન્વેગાન્વિનયેદ્વૈ તપસ્વી
નિન્દા ચાસ્ય હૃદયં નોપહન્યાત્ ॥ ૧૭॥

મધ્યસ્થ એવ તિષ્ઠેત પ્રશંસા નિન્દયોઃ સમઃ ।
એતત્પવિત્રં પરમં પરિવ્રાજક આશ્રમે ॥ ૧૮॥

મહાત્મા સુવ્રતો દાન્તઃ સર્વત્રૈવાનપાશ્રિતઃ ।
અપૂર્વ ચારકઃ સૌમ્યો અનિકેતઃ સમાહિતઃ ॥ ૧૯॥

વાન પ્રસ્થગૃહસ્થાભ્યાં ન સંસૃજ્યેત કર્હિ ચિત્ ।
અજ્ઞાતલિપ્સાં લિપ્સેત ન ચૈનં હર્ષ આવિશેત્ ॥ ૨૦॥

વિજાનતાં મોક્ષ એષ શ્રમઃ સ્યાદવિજાનતામ્ ।
મોક્ષયાનમિદં કૃત્સ્નં વિદુષાં હારિતોઽબ્રવીત્ ॥ ૨૧॥

અભયં સર્વભૂતેભ્યો દત્ત્વા યઃ પ્રવ્રજેદ્ગૃહાત્ ।
લોકાસ્તેજોમયાસ્તસ્ય તથાનન્ત્યાય કલ્પતે ॥ ૨૨॥

॥ ઇતિ શ્રી મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ હારીતગીતાયાં
અષ્ટસપ્તત્યધિકદ્વિશતતમોઽસ્ધ્યાય ॥

Adhyaya number 269 in shAntiparva, Mahabharata critical edition (Bhandarkar Oriental Research Institute BORI) does not include verses 15-16.
In Kinjavadekar's edition the adhyAya is 278.

Proofread by Sunder Hattangadi (sunderh at hotmail.com)

.. hArItagItA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*